# श्री संकटनाशन गणेशस्तोत्रं

**। नारद उवाच ।**

प्रणम्य शिरसा देवं, गौरीपुत्रं विनायकम् ।
भक्तावासं स्मरेन्नित्यं, आयुःकामार्थसिद्धये ॥ 1
प्रथमं वक्रतुंडं च, एकदन्तं द्वितीयकम् ।
तृतीयं कृष्णपिंगाक्षं, गजवक्त्रं चतुर्थकम् ॥ 2
लंबोदरं पंचमं च, षष्ठं विकटमेव च ।
सप्तमं विघ्नराजं च, धूम्रवर्णं तथाष्टमम् ॥ 3
नवमं फालचन्द्रं च, दशमं तु विनायकम् ।
एकादशं गणपतिं, द्वादशं तु गजाननम् ॥ 4
द्वादशैतानि नामानि, त्रिसंध्यं यः पठेन्नरः ।
न च विघ्नभयं तस्य, सर्वसिद्धिकरं प्रभो! ॥ 5
विद्यार्थी लभते विद्यां, धनार्थी लभते धनम् ।
पुत्रार्थी लभते पुत्रान्, मोक्षार्थी लभते गतिम् ॥ 6
जपेद्गणपतिस्तोत्रं, षड्भिर्मासैः फलं लभेत् ।
संवत्सरेण सिद्धिं च, लभते नात्र संशयः ॥ 7
अष्टभ्यो ब्राह्मणेभ्यश्च, लिखित्वा यः समर्पयेत् ।
तस्य विद्या भवेत् सर्वा, गणेशस्य प्रसादतः ॥ 8

॥ इति श्री नारदपुराणे संकटनाशन गणेशस्तोत्रं संपूर्णम् ॥

© 2022 Vedam Nadam